रस्तत्वाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं व्यतिरेकिसाध्यमिति भावः। व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति तु तुच्छम्, येन विना प्रतीतिर्न पर्य्यवस्यति तस्यैव तत्र प्रकारत्वात् अन्यथा द्व्यणुकं कार्य्यानाश्रितं सत् क्वचिदाश्रितम् अवयवित्वादित्यादावकार्य्याश्रितत्वप्रकारिकाऽनुमितिर्न स्यात्४। ननु सिद्ध्यतु आत्मा स्थिरः, स तु नित्य इति कुतः, कुतश्च द्रव्यमित्यत आह। यथा वायुपरमाणोरवयवकल्पनायां न प्रमाणमतोनित्यत्वं तथात्मनोऽपि, यथा गुणवत्त्वाद्वायुपरमाणुर्द्रव्यं तथात्माऽपीत्यर्थः५। पूर्व्वपक्षमाह। सन्निकर्षे सति अयं यज्ञदत्त इति प्रत्यक्षं नास्ति चेत् तदा दृष्टं प्रत्यक्षतो गृहीतव्याप्तिकं लिङ्गं नास्ति, यथा वह्निना प्रत्यक्षेण सहचरितो गृहीतो धूमो वह्नौ दृष्टं लिङ्गं तथात्मसाधकं लिङ्गं दृष्टं नास्तीत्यर्थः६। ननु प्रत्यक्षदृष्टव्याप्तिकस्य दृष्टलिङ्गस्याभावेऽपि सामान्यतोदृष्टमेव लिङ्गं भविष्यति नहि ततो नानुमितिरित्याशङ्क्य पुनः पूर्व्वपक्षी आह। सामान्यतोदृष्टमपि लिङ्गं भवति न तु तत आत्मत्वेन अष्टद्रव्यातिरिक्तद्रव्यत्वेन वा स्यादात्मसिद्धिः किन्तु तेनेच्छादीनां क्वचिदाश्रितत्वमात्रं सिद्ध्यतु तच्च नात्ममननौपयिकमित्यर्थः तदेतदाह अविशेष इति७। तत् किं "योऽपहतपाप्मा स आत्मा" इत्याद्यागमोऽनर्थक एवेत्याशङ्क्य स एवाह। आगममात्रसिद्ध एवात्मा न त्वनुमेयः दृष्टसामान्यतोदृष्टयोर्लिङ्गयोरभावात् तस्मात् सम्यगुपनिषदां श्रवणात् तत्त्वसाक्षात्कार उत्पद्यते न तु मननप्रणालिकया, तथाच मननप्रयोजनकमिदं तन्त्रमतन्त्रम्, दृष्टं हि भूतदशकनदीसन्तरणादावुपदेशमात्रादेव साक्षात्कारि ज्ञानम्८। तदेवं त्रिभिः सूत्रैः पूर्व्वपक्षे सिद्धान्तवाद्याह। नागममात्रं प्रमाणमात्मनि, किन्त्वहमिति पदमात्मपदं वा साभिधेयं पदत्वात् घटादिपदवत् इत्यनुमानादप्यात्मसिद्धिः। ननु पृथिव्याद्येव तदभिधेयं स्यादित्यत आह व्यतिरेकादिति पृथिव्यादितोऽहमिति पदस्य व्यतिरेकाद्व्यावृत्तेरित्यर्थः। नहि भवत्यहं पृथिवी अहमापः अहन्तेजः अहं वायुः अहमाकाशम् अहं कालः अहं दिक् अहं मन इति व्यपदेशः, प्रत्ययो वा। शरीरे भवतीति चेन्न परशरीरेऽपि तत्प्रसङ्गात्, स्वशरीरे भवतीति चेन्न स्वस्यात्मभिन्नस्यानिरुक्तेः मम शरीरमिति वैयधिकरण्येन प्रत्ययाच्च। नन्विदमपि सामान्यतोदृष्टमेव तच्च विशेषापर्य्यवसन्नमिति दूषितमेवेति चेन्न अहम्पदेऽहन्त्वमात्मत्वमेव प्रकारः तथा च पक्षधर्म्मताबलादेवाऽहन्त्वस्य प्रवृत्तिनिमित्तत्वं पर्य्यवसन्नं तच्चानन्यसाधारणमेवेति विशेषसिद्धेः एवं सामान्यतोदृष्टादपि बाधसहकृताद्विशेषसिद्धिः। यच्चोक्तं श्रवणादेव साक्षात्कारः किं मननेनेति तदयुक्तम् नहि मननमन्तरेण सङ्कशुकस्याश्रद्धामलक्षालनम्, नच तदन्तरेण तत्र निदिध्यासनाधिकारः, नच निदिध्यासनमन्तरेण सवासनमिथ्याज्ञानोन्मूलनक्षमस्तत्त्वसाक्षात्कारः, अभ्यासादेव हि कामातुरस्याकस्मात् कामिनीसाक्षात्कारः, नहि शाब्दमानुमानिकं वा ज्ञानं मिथ्याज्ञानोन्मूलनक्षमं दिङ्मोहादौ दृष्टमिति भावः। ननु तथापि परोक्षे आत्मनि कथं सङ्केतग्रह इति चेत् क एवमाह नात्मा प्रत्यक्ष इति, किन्तु मनसा संयोगप्रत्यासत्त्यात्मग्रहः। कथमन्यथाऽहं सुखी जानामीच्छामि यते दुःखीत्यादिप्रत्ययः नह्ययमवस्तुकः सन्दिग्धवस्तुको वा, नीलादिप्रत्ययवत् अस्यापि निश्चितवस्तुकत्वात्, नच लैङ्गिकः, लिङ्गज्ञानमन्तरेणापि जायमानत्वात्, नापि शाब्दः, तदनुसन्धानाननुविधानात्, प्रत्यक्षाभासोऽयमिति चेत्, तर्हि क्वचिदनाभासविषयोऽपि। नह्यप्रमितमारोप्यते इत्यावेदयिष्यते९। एवञ्चेत् किमनुमानेनेति पूर्व्वपक्षवादी आह। इतिशब्दो ज्ञानप्रकारमाह दृष्टमिति भावे-क्तप्रत्ययान्तम्, अन्वक्षमित्यध्यक्षं तेनायमर्थः अयं देवदत्तः अयं यज्ञदत्त इति प्रकारकं दृष्टं दर्शनं अध्यक्षमेवास्ति यदि किमनुमानप्रयासेन "नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः"१०। अत्र सिद्धान्त्याह। दृष्टे प्रत्यक्षेण गृहीते आत्मनि लिङ्गे सम्भूतसामग्रीके सति एक एव एकवैषयिक एव प्रत्ययः। प्रत्यय इति निरस्तसमस्तविभ्रमाशङ्कित्वमाह, कुत एवमित्यत आह दृढत्वात् प्रमाणसंप्लवेनान्यथाभावशङ्कानिरसनपटुत्वात्, तत्र दृष्टान्तमाह प्रत्यक्षवदिति यथा दूरात्तोयप्रत्यक्षे सत्यपि संवादार्थं बलाकालिङ्गेनाऽपि तदनुमानं तदुक्तम् "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति, इदमत्राकूतम् यद्यात्मा कदाचित् प्रत्यक्षे चेतसि भासत एव तथापि अहं गौरः अहं कृश इत्यादिविरोधिप्रत्ययान्तरतिरस्कृतो न तथा स्थेमानमासादयति विद्युत्सम्पातसञ्जातज्ञानवत्, तत्र लिङ्गेन अनन्यथासिद्धेन ज्ञानान्तरमुत्पद्यमानं पूर्व्वज्ञानमेव स्थिरीकरोति। किञ्च "श्रोतव्यो मन्तव्य" इत्यादिविधिबोधितस्यात्ममननस्य इष्टसाधनत्वावगतौ अनुमित्सयाऽवश्यमात्मन्यनुमानप्रवृत्तिः तद्व्यतिरेके निदिध्यासनासम्भवे साक्षात्काराभावेऽपवर्गासम्भवादिति भावः। अहं देवदत्तोऽहं यज्ञदत्त इति प्रती-